श्वेतधामा, [न्] पुं, (श्वेतं धाम किरणं यस्य ।) चन्द्रः । कर्पूरः । समुद्रफेनः । इति मेदिनी ॥

श्वेतनीलः, पुं, (श्वेतो नीलश्च । वर्णो वर्णेनेति समासः ।) मेघः । इति शब्दरत्नावली ॥ शुक्लनीलवर्णश्च ॥

श्वेतपत्रः, पुं, (श्वेतं पत्रं पक्षो यस्य ।) हंसः । इति श्वेतपत्ररथशब्दार्थदर्शनात् । शुक्लपर्णे, क्ली ॥

श्वेतपत्ररथः, पुं, श्वेतपत्रो हंसो रथो वाहनं यस्य । ब्रह्मा । इति शब्दमाला ॥

श्वेतपद्मं, क्ली, (श्वेतं शुक्लं पद्मम् ।) सिताम्भोजम् । तत्पर्य्यायः । सिताब्जम् २ पुण्डरीकम् ३ श्वेतवारिजम् ४ हरिनेत्रम् ५ शरत्पद्मम् ६ शारदम् ७ शम्भुवल्लभम् ८ । अस्य गुणाः । हिमत्वम् । तिक्तत्वम् । मधुरत्वम् । पित्तदाहास्रभ्रमदोषपिपासानाशित्वञ्च । इति राजनिर्घण्टः ॥

श्वेतपर्णा, स्त्री, (श्वेतानि पर्णानि यस्याः ।) वारिपर्णी । इति रत्नमाला ॥ पाना इति भाषा ॥ (भद्राश्ववर्षस्य पर्वतविशेषे, पुं । यथा, मार्कण्डेये । ५८ । ४ ।

"पूर्व्वेण यत् स्थितं वर्षं भद्राश्वं तन्निबोध मे ।
श्वेतपर्णश्च नीलश्च शैवालश्चाचलोत्तमः ।
कौरञ्जः पर्णशालाग्रः पञ्चैते तु कुलाचलाः ॥")

श्वेतपर्णासः, पुं, (श्वेतः पर्णासः ।) श्वेततुलसी । यथा,—

"अर्ज्जकः श्वेतपर्णासो गन्धपत्रः कुठेरकः ॥"
इति रत्नमाला ॥

श्वेतपाटला, स्त्री, (श्वेता पाटला ।) शुक्लपाटलावृक्षः । इति जटाधरः ॥

श्वेतपिङ्गः, पुं, (देहेन श्वेतः जटया पिङ्गश्च । वर्णो वर्णेनेति समासः ।) सिंहः । इति हेमचन्द्रः ॥

श्वेतपिङ्गलः, पुं, (श्वेतः पिङ्गलश्च ।) सिंहः । इति त्रिकाण्डशेषः ॥ शुक्लकपिलवर्णयुक्ते, त्रि ॥ (महादेवः । यथा, महाभारते । १३ । १७ । १३६ ।

"महाप्रसादो दमनः शत्रुहा श्वेतपिङ्गलः ॥")

श्वेतपिङ्गलकः, पुं, (श्वेतपिङ्गल + स्वार्थे कन् ।) सिंहः । इति शब्दमाला ॥

श्वेतपिण्डीतकः, पुं, (श्वेतः शुक्लः पिण्डीतकः ।) महापिण्डीतरुः । इति राजनिर्घण्टः ॥

श्वेतपुष्पः, पुं, (श्वेतानि पुष्पाणि यस्य ।) सिन्धुवारवृक्षः । इति जटाधरः राजनिर्घण्टश्च ॥ (श्वेतं पुष्पम् ।) शुक्लकुसुमे, क्ली । (यथा, सुश्रुते । १ । ११ ।

"श्वेतपुष्प-रक्तपुष्प-सहस्रं जुहुयात् ॥")

श्वेतपुष्पकः, पुं, (श्वेतानि पुष्पाणि यस्य । कप् ।) करवीरवृक्षः । इति राजनिर्घण्टः ॥ शुक्लपुष्पयुक्ते, त्रि ॥

श्वेतपुष्पा, स्त्री, (श्वेतं पुष्पं यस्याः ।) घोषातकी । श्वेतघोषा इति भाषा । इति रत्नमाला । नागदन्ती । मृगेर्व्वारुः । इति राजनिर्घण्टः ॥

श्वेतपुष्पिका, स्त्री, (श्वेतं पुष्पं यस्याः । ततः स्वार्थे कन् । टापि अत इत्वम् ।) पुत्रदात्री । महाशणपुष्पिका । इति राजनिर्घण्टः ॥

श्वेतप्रसूनकः, पुं, (श्वेतानि प्रसूनानि यस्य । कप् ।) वृक्षविशेषः । यथा,—

"तिक्तः शाकतरुः सेतुवृक्षः श्वेतप्रसूनकः ।"
इति शब्दमाला ॥

शुक्लपुष्पयुक्ते, त्रि ॥

श्वेतबृहती, स्त्री, (श्वेता बृहती ।) शुक्लक्षुद्रवार्त्ताकी । तत्पर्य्यायः । श्वेता २ श्वेतमहोटिका ३ श्वेतसिंही ४ श्वेतफला ५ श्वेतवार्त्ताकिनी ६ । अस्या गुणाः ।

"विज्ञेया श्वेतबृहती वातश्लेष्मविनाशिनी ।
रुच्या व्यञ्जनयोगेन नानानेत्रामयापहा ॥"
इति राजनिर्घण्टः ॥

श्वेतभण्डा, स्त्री, (श्वेता भण्डा ।) श्वेतापराजिता । इति रत्नमाला ॥

श्वेतमन्दारकः, पुं, (श्वेतो मन्दारकः ।) वृक्षविशेषः । श्वेत आक इति हिन्दी भाषा ॥ तत्पर्य्यायः । पृथ्वीकुरुवकः २ दीर्घायुष्यः ३ सितालर्कः ४ दीर्घालर्कः ५ सिताह्वयः ६ । इति राजनिर्घण्टः ॥

श्वेतमरिचं, क्ली, (श्वेतं मरिचमिव ।) शोभाञ्जनबीजम् । इत्यमरः ॥ शुक्लमरिचञ्च ॥

श्वेतमालः, पुं, (श्वेता शुक्लवर्णा माला यस्य ।) मेघः । धूमः । इति विश्वः ॥ मेदिनीशब्दरत्नावल्योः खतमाल इति पाठः ॥

श्वेतरक्तः, पुं, (श्वेतो रक्तश्च ।) पाटलवर्णः । इत्यमरः ॥ गोलावी रङ् इति भाषा ॥

श्वेतरञ्जनं, क्ली, (श्वेतं सिताभ्रं रञ्जयतीति । रञ्ज + ल्युः ।) सीसकम् । इति केचित् ॥

श्वेतरथः, पुं, (श्वेतो रथो यस्य ।) शुक्रग्रहः । इति शब्दरत्नावली ॥ शुक्लवर्णस्यन्दनश्च ॥

श्वेतराजी, स्त्री, (श्वेतेन वर्णेन राजते इति । राज + अच् । गौरादित्वात् ङीष् ।) चञ्चेण्डा । इति राजनिर्घण्टः ॥

श्वेतरोचिः, [स्] पुं, (श्वेतं रोचिर्यस्य ।) चन्द्रः । इति हलायुधः ।

श्वेतरोहितः, पुं, (पुष्पेण श्वेतः फलेन लोहितः लस्य रः ।) वृक्षविशेषः । श्वेत रोहिड़ इति हिन्दी भाषा । तत्पर्य्यायः । सितपुष्पः २ सिताह्वयः ३ सिताङ्गः ४ शुक्लरोहितः ५ लक्ष्मीवान् ६ जनवल्लभः ७ । अस्य गुणाः । कटुत्वम् । स्निग्धत्वम् । कषायत्वम् । सुशीतलत्वम् । क्रमिदोषव्रणप्लीहरक्तनेत्रामयनाशित्वञ्च । इति राजनिर्घण्टः ॥

श्वेतलोध्रः, पुं, (श्वेतो लोध्रः ।) पट्टिकालोध्रः । इति राजनिर्घण्टः ॥

श्वेतवचा, स्त्री, (श्वेता वचा ।) अतिविषा । शुक्लवचा । सादा वच् इति भाषा । तत्पर्य्यायः । मेध्या २ षड्ग्रन्था ३ दीर्घपत्रिका ४ तीक्ष्णगन्धा ५ हैमवती ६ मङ्गल्या ७ । अस्या गुणाः । अतिगुणाढ्यत्वम् । मतिमेधायुःसमृद्धिदत्वम् । कफनाशित्वञ्च । इति राजनिर्घण्टः ॥ अन्यच्च ।

"पारसीकवचा शुक्ला प्रोक्ता हैमवतीति सा ।
हैमवत्युदिता तद्वच्छूलं हन्ति विशेषतः ॥"

तद्वत् वचावत् । इति भावप्रकाशः ॥

श्वेतवल्कलः, पुं, (श्वेतं वल्कलं यस्य ।) उडुम्बरवृक्षः । इति जटाधरः ॥ शुक्लत्वक् च ॥

श्वेतवाजी, [न्] पुं, (श्वेतो वाजी घोटको यस्य ।) चन्द्रः । इति हेमचन्द्रः ॥ अर्ज्जुनः इति जटाधरः ॥ शुक्लघोटकश्च ॥

श्वेतवासाः, [स्] पुं, श्वेतं वासो यस्य ।) शुक्लवस्त्रधारिसन्न्यासी । इति हलायुधः ॥ परिहितशुक्लवसने, त्रि ॥

श्वेतवाः, [ह्] पुं, (श्वेतेन वाहनेन उह्यते इति वह + ण्विः ।) इन्द्रः । इति मुग्धबोधव्याकरणम् ॥

श्वेतवाहः, पुं, (श्वेतः शुक्लो वाहो घोटको यस्य ।) अर्ज्जुनः । इन्द्रः । इति केचित् ॥

श्वेतवाहनः, पुं, (श्वेतं वाहनं यस्य ।) चन्द्रः । अर्ज्जुनः । इति मेदिनी ॥ (यथा, महाभारते । ४ । ४२ । १५ ।

"श्वेताः काञ्चनसन्नाहा रथे युज्यन्ति मे हयाः ।
संग्रामे युध्यमानस्य तेनाहं श्वेतवाहनः ॥")

मकरः । इति शब्दरत्नावली ॥ (राजाधिदेवस्य पुत्त्रः । स तु विदूरथस्य पौत्त्रः । यथा, हरिवंशे । ३८ । २ ।

"राजाधिदेवः शूरस्य विदूरथसुतोऽभवत् ।
राजाधिदेवपुत्त्रास्तु जज्ञिरे वीर्य्यवत्तराः ।
दत्तातिदत्तौ बलिनौ पानश्वः श्वेतवाहनः ॥")

श्वेतवाही, [न्] पुं, (श्वेतवाहः श्वेतघोटकोऽस्यास्तीति । इनिः ।) अर्ज्जुनः । इति शब्दरत्नावली ॥

श्वेतवुक्का, स्त्री, (श्वेता वुक्का ।) वनतिक्ता । यथा,—

श्वेतवुक्का कपोतस्तु वनतिक्ता विसर्पिणी ।
शङ्खिनी चाकचिक्या च गिरिजा धूसरच्छदा ॥"
इति रत्नमाला ॥

श्वेतवृक्षः, पुं, (श्वेतो वृक्षः ।) वरुणवृक्षः । इति राजनिर्घण्टः ॥ शुक्लतरुश्च ॥

श्वेतशरपुङ्खा, स्त्री, (श्वेता शरपुङ्खा ।) क्षुपविशेषः । श्वेत शरफोँका इति हिन्दी भाषा । तत्पर्य्यायः । सितशायका २ सितपुङ्खा ३ श्वेतपुङ्खा ४ शुभ्रपुङ्खा ५ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । क्रमिवातरुजापहत्वम् । गुणाढ्यत्वञ्च इति राजनिर्घण्टः ॥

श्वेतशिग्रुः, पुं, (श्वेतः शुक्लः शिग्रुः ।) शुक्लशोभाञ्जनः । सादा शजिना इति भाषा । तत्पर्य्यायः । सुतीक्ष्णः २ सुखभङ्गः ३ सिताह्वयः ४ सुमूलः ५ श्वेतमरिचः ६ रोचनः ७ मधुशिग्रुकः ८ । अस्य गुणाः । कटुत्वम् । तीक्ष्णत्वम् । शोफानिलाङ्गव्यथासुखजाड्यनाशित्वम् । रुच्यत्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥